# Purushottamastavanam

# પુરુષોત્તમસ્તવનમ્

## Document Information

Text title : Purushottamastavanam

File name : puruShottamastavanam.itx

Category : vishhnu, vishnu, lakShmInArAyaNIyasaMhitA, stava

Location : doc_vishhnu

Proofread by : PSA Easwaran

Description/comments : lakShmInArAyaNIyasaMhitA | khaNDa 3 | adhyAya 190/1-181||

Latest update : April 12, 2026

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

April 12, 2026

*sanskritdocuments.org*

# પુરુષોત્તમસ્તવનમ્

(મહાસૌરાષ્ટ્રીયસઙ્ઘસ્ય લુણ્ઠકજનપ્રધર્ષિતસ્ય પુરુષોત્તમસ્તવનમ્)
શ્રીપુરુષોત્તમ ઉવાચ ।
શ‍ૃણુ નારાયણીશ્રિ ત્વં ચમત્કારમયીં કથામ્ ।
મહાસૌરાષ્ટ્રદેશીયા ભક્તાઃ સઙ્ઘગતાઃ શતમ્ ॥ ૧॥

કુઙ્કુમવાપિકાક્ષેત્રં સોમનાથં ચ રૈવતમ્ ।
સ્વર્ણવતીં કૃષ્ણભૂમિં ગોપનાથં ચ સુન્દરમ્ ॥ ૨॥

એવમાદીનિ તીર્થાનિ કર્તું સૌરાષ્ટ્રમાયયુઃ ।
માર્ગે મહીં તથા વાપીં તીર્ત્વા નાવા તતઃ પરમ્ ॥ ૩॥

સાભ્રમતીં સમુત્તીર્ય ગોપનાથં સમાયયુઃ ।
તતો ગુપ્તપ્રયાગં ચ કૃત્વા સિંહવનં મહત્ ॥ ૪॥

પ્રવિશ્ય યાવદાયાન્તિ સોમનાથં પ્રતિ દ્રુતમ્ ।
સિંહારણ્યે તદા પ્રાપ્તા લુણ્ઠકાઃ શસ્ત્રધારિણઃ ॥ ૫॥

લુણ્ઠકાધિપતિસ્તેષુ નામ્ના સામાન્તવિક્રમઃ ।
અશ્વવારૈશ્ચ સહિતઃ શસ્ત્રાદિયુગ્ભટાન્વિતઃ ॥ ૬॥

યન્ત્રનાદાનકરોદ્વૈ સન્નિધૌ નાઽતિદૂરગઃ ।
આક્રોશાન્ ભયદાઁશ્ચાપિ ચક્રુસ્તસ્યાનુગામિનઃ ॥ ૭॥

લુણ્ઠનાર્થં દ્રુતં સઙ્ઘસ્યાઽભિતો બન્ધનં વ્યધુઃ ।
મધ્યે ચક્રુર્ભયદાનૈઃ સઙ્ઘસ્ય શતમાનવાન્ ॥ ૮॥

સ્ત્રીણાં ભૂષા નરાણાં ચ ભૂષાદ્રવ્યાણિ યાનિ ચ ।
ઉત્તારયિત્વા ત્વેકત્ર કારયામાસુરુલ્બણાઃ ॥ ૯॥

શુભામ્બરાણિ સર્વાણિ જગૃહુઃ સઙ્ઘવર્તિનામ્ ।
સઙ્ઘાગ્રગણ્યવણિજો બબન્ધૂ રજ્જુભિસ્તદા ॥ ૧૦॥

પદ્મચન્દ્રં શઙ્ખચન્દ્રં શૃઙ્ખલાચન્દ્રમિત્યપિ ।
વનચન્દ્રં વાલિચન્દ્રં બબન્ધુસ્તે હિ લુણ્ઠકાઃ ॥ ૧૧॥

અન્યાન્ દણ્ડૈસ્તાડનાદિ પ્રચક્રુર્ભયહેતવે ।
ભીતાસ્તે વણિજઃ સર્વે મૌના બભૂવુરર્દિતાઃ ॥ ૧૨॥

દદુઃ સર્વસ્વમેતેભ્યો લુણ્ઠકેભ્યોઽતિતાડિતાઃ ।
અથૈતેષુ મમ ભક્તો વૈષ્ણવો વનચન્દ્રકઃ ॥ ૧૩॥

તસ્ય પત્ની સુખાદેવી મમ ભક્તાઽભવદ્ રમે ।
આબાલ્યાત્તૌ મમ ભક્તૌ ભજતો માં નિરન્તરમ્ ॥ ૧૪॥

સાધોર્મે સાયનાયનનામ્નો યોગેન વૈષ્ણવૌ ।
વર્તેતે તૌ ભક્તિયુક્તૌ કૃષ્ણનારાયણાશ્રિતૌ ॥ ૧૫॥

આપત્કાલે તુ તૌ ભક્તૌ સસ્મરતુસ્તદા હિ મામ્ ।
અન્યેઽપિ બાલગોપાલા રુરુદુઃ સસ્મરુઃ પ્રભુમ્ ॥ ૧૬॥

લુણ્ઠકેભ્યો હરે કૃષ્ણ પ્રરક્ષય હિ તીર્થિનઃ ।
અનાથાનાં વને કૃષ્ણનાથનારાયણો ભવાન્ ॥ ૧૭॥

ત્રાતા મોચયિતા દુઃખાદ્રક્ષયિતા પિતા ભવાન્ ।
માતા ગુરુર્હરિકૃષ્ણો બાલકૃષ્ણઃ પ્રરક્ષતુ ॥ ૧૮॥

યતો વયં કૃતપાપા લુણ્ઠ્યન્તેઽતો વનાન્તરે ।
તથાપિ નિજભક્તાનાં રક્ષાં વિધેહિ માધવ ॥ ૧૯॥

તવ ભક્તિં કરિષ્યામો દાનં દાસ્યામ એવ તે ।
સર્વસ્વં ભગવન્ વિષ્ણો રક્ષ કૃષ્ણનરાયણ ॥ ૨૦॥

કુઙ્કુમવાપિકાતીર્થેઽર્પયિષ્યામો ધનાદિકમ્ ।
યદિ લુણ્ઠકદુષ્ટેભ્યો રક્ષાં નસ્ત્વં વિધાસ્યસિ ॥ ૨૧॥

વિભૂષણાનિ સર્વાણિ શ્રેષ્ઠામ્બરાણિ યાનિ ચ ।
રૂપ્યકાઃ સ્વર્ણમુદ્રાશ્ચ દાસ્યામોઽશ્વસરોવરે ॥ ૨૨॥

વ્રતં કાર્તિકમાસાદ્ય કરિષ્યામો ફલાદિભિઃ ।
નિત્યં શતં માલિકાશ્ચાઽઽવર્તયિષ્યામ એવ ચ ॥ ૨૩॥

સતાં મઠેષુ વૈ માસં માસં સ્થિત્વા તુ માઘકે ।
માસે સેવાં કરિષ્યામઃ સતામાજ્ઞાનુસારિણીમ્ ॥ ૨૪॥

ઇત્યેવં વનચન્દ્રાદ્યા આર્ત્તા લુણ્ઠકધર્ષિતાઃ ।
માનતા વિવિધાશ્ચક્રુર્લુણ્ઠકેભ્યો વિમુક્તયે ॥ ૨૫॥

વનચન્દ્રસ્ય ભાર્યાઽપિ સુખાદેવી તથા સ્ત્રિયઃ ।
યા યાઃ સઙ્ઘગતાશ્ચાસન્ પ્રાર્થયામાસુરેવ મામ્ ॥ ૨૬॥

હે હરે હે વનવાસિન્ વૃન્દાવનવિહારકૃત્ ।
ગોપીસઙ્ઘાન્તરગુપ્ત કૃષ્ણ રક્ષ સ્વદાસિકાઃ ॥ ૨૭॥

અબલાનાં સબલોઽસિ ભક્તાનાં ભગવાનસિ ।
દાસીનાં મોદકર્તાઽસિ કૃષ્ણ રક્ષય દાસિકાઃ ॥ ૨૮॥

વને ગોપીવિહારોઽસિ રાધાસખોઽસિ નિર્જને ।
શયને કમલાનન્દ કૃષ્ણ રક્ષય દાસિકાઃ ॥ ૨૯॥

પ્રલયે મુક્તસેવ્યોઽસિ સૃષ્ટૌ ભક્તિમતીપતિઃ ।
રાસે સર્વાનુરક્તોઽસિ કૃષ્ણ રક્ષય દાસિકાઃ ॥ ૩૦॥

વિપત્તૌ ચાર્ત્તદીનેશ શરણાગતરક્ષક ।
અરાતિકષ્ટહર્તસ્ત્વં કૃષ્ણ રક્ષય દાસિકાઃ ॥ ૩૧॥

ગર્ભે ભ્રૂણસ્ય પોષ્ટા ત્વં બાલ્યે નિર્મલહૃત્સ્થિતઃ ।
યૌવને પ્રેમપાત્રં ત્વં કૃષ્ણ રક્ષય દાસિકાઃ ॥ ૩૨॥

વાર્ધક્યે શિષ્ટવર્ય ત્વં યુદ્ધે જયપ્રદઃ પુમાન્ ।
નિરાશ્રયે ત્વં ચાધારઃ કૃષ્ણ રક્ષય દાસિકાઃ ॥ ૩૩॥

રોહિણાણ્ડાસુરઃ પૂર્વમનાદિધ્રુનરાયણઃ ।
ભૂત્વા નિષૂદિતઃ કૃષ્ણ ત્વયા નઃ સ પ્રરક્ષતુ ॥ ૩૪॥

અનાદિશ્રીમેરુનારાયણસ્ત્વં ચાઽભવં પુરા ।
નિમ્નં તુ પતમાનસ્ય મેરોઃ રક્ષા ત્વયા કૃતા ॥ ૩૫॥

સૂર્યાગ્નિના દહ્યમાનબ્રહ્માણ્ડસ્ય ત્વયા પુરા ।
રક્ષા શાન્તિઃ કૃતાઽનાદિવિષ્ણુનારાયણાત્મના ॥ ૩૬॥

ધૂમ્રાસુરવિનાશશ્ચ ચન્દ્રરક્ષા ત્વયા પુરા ।
વિહિતા શ્રીહરેઽનાદિદેવનારાયણાત્મના ॥ ૩૭॥

ત્વયાઽનાદિયજ્ઞનારાયણ યજ્ઞાઃ પ્રવર્તિતાઃ ।

રુદ્રશાસ્તાઽનાદિબ્રહ્મનારાયણો હ્યભૂઃ પુરા ॥ ૩૮॥

દેવધિષ્ણ્યનિયમાયાઽનાદ્યાઽઽદિત્યનરાયણઃ ।
ભવાન્ પુરાઽઽભવત્ કૃષ્ણ કૃષ્ણ રક્ષય દાસિકાઃ ॥ ૩૯॥

નાગશાસ્તાઽનાદિગરુત્મન્નારાયણરૂપવાન્ ।
ધ્રુવસ્થિત્યૈ ભવાનનાદ્યાર્ષનારાયણોઽભવત્ ॥ ૪૦॥

ષુરાનન્દાદિદૈત્યાનાં પરાભૂત્યર્થમેવ હ ।
ત્વમનાદિપ્રાજ્ઞનારાયણોઽભવઃ પરેશ્વર ॥ ૪૧॥

ત્વમનાદિવીરનારાયણોઽભવો વૃષાવનઃ ।
ત્વમનાદિભદ્રનારાયણો દગ્ધપ્રમુક્તયે ॥ ૪૨॥

તુઙ્ગભદ્રાસનાપુત્રીપતિર્હરિનરાયણઃ ।
અભવસ્ત્વં પુરા કૃષ્ણ કૃષ્ણ રક્ષય દાસિકાઃ ॥ ૪૩॥

નાશાર્થં કોશસ્તેનાખ્યરક્ષસસ્ત્વં પુરાઽભવઃ ।
અનાદિશ્રીબીજનારાયણો બીજસ્ય રક્ષકઃ ॥ ૪૪॥

ધર્મવ્રતસ્ય પુત્રાણાં મોક્ષાર્થં ત્વં પુરાઽભવઃ ।
અનાદિશ્રીવરનારાયણો ના કૃષ્ણ રક્ષતુ ॥ ૪૫॥

સુદર્શનીમહાસાધ્વીશાપેન સ્ત્રીમયં જગત્ ।
રક્ષાર્થં ત્વમનાદિસ્ત્રીપુન્નારાયણતામગાઃ ॥ ૪૬॥

અનાદિશ્રીજલનારાયણસ્ત્વં માકરાસુરમ્ ।
હત્વા લોકાનરક્ષઃ શ્રીકૃષ્ણ રક્ષય દાસિકાઃ ॥ ૪૭॥

અનાદિશ્રીશીલનારાયણસ્ત્વમભવઃ પુરા ।
સાધુધર્મપ્રરક્ષાર્થં કૃષ્ણ રક્ષય દાસિકાઃ ॥ ૪૮॥

અનાદિશ્રીવાર્ધિનારાયણસ્ત્વમભવઃ પુરા ।
વ્યાઘ્રાનલાદિનાશાર્થં કૃષ્ણ રક્ષય દાસિકાઃ ॥ ૪૯॥

ત્વમનાદિચતુર્મુખનારાયણોઽભવઃ પુરા ।
રાધનિકાપુણ્યરાતવિપ્રયોરિષ્ટદો ભવાન્ ॥ ૫૦॥

અભવચ્છ્રીછ્રીપુરુષોત્તમનારાયણઃ પુરા ।
તીર્થપૂત્યર્થમનાદિતીર્થનારાયણોઽભવઃ ॥ ૫૧॥

ભક્ત્યર્થં ત્વમનાદિશ્રીજીવનારાયણોઽભવઃ ।
યજ્ઞે ત્વં શ્રીમદર્ધશ્રીશ્વરનારાયણોઽભવ ॥ ૫૨॥

પિત્રુદ્ધર્તાઽનાદ્યર્ધશ્રીપિતૃનારાયણોઽભવઃ ।
ભક્ત્યા મોક્ષોપદેશાર્થં પ્લક્ષનારાયણોઽભવઃ ॥ ૫૩॥

નરમેધે ભક્તરક્ષામનાદિપુન્નરાયણઃ ।
ભૂત્વાઽકરોસ્ત્વં દેવેશ કૃષ્ણ રક્ષય દાસિકાઃ ॥ ૫૪॥

સૂર્યવર્ચ્યનૃપદ્વારાઽનાદિશ્યામનરાયણઃ ।
અભવસ્ત્વં પુરા કૃષ્ણ કૃષ્ણ રક્ષય દાસિકાઃ ॥ ૫૫॥

અનાદિશ્રીરાજનારાયણસ્ત્વં ચાઽભવઃ પુરા ।
માયૂરકાઽસુરહન્તા કૃષ્ણ રક્ષય દાસિકાઃ ॥ ૫૬॥

અનાદિશ્રીબ્રહ્મચારિનારાયણોઽભવઃ પુરા ।
નૈષ્ઠિકતારક્ષણાર્થં કૃષ્ણ રક્ષય દાસિકાઃ ॥ ૫૭॥

હલ્લકાસુરનાશાર્થં શિવોજ્જીવાર્થમિત્યપિ ।
અનાદિશ્રીશિવનારાયણસ્ત્વં ચાઽભવઃ પુરા ॥ ૫૮॥

અનાદિશ્રીસ્વર્ણનારાયણસ્ત્વં ચાઽભવઃ પુરા ।
કુબેરસ્યોજ્જીવનાર્થં કૃષ્ણ રક્ષય દાસિકાઃ ॥ ૫૯॥

જ્વાલારુણાઽચલવહ્નિરસદગ્ધપ્રજાઽવનમ્ ।
અનાદિશ્રીસ્વામિનારાયણસ્ત્વં ચાઽકરોઃ પુરા ॥ ૬૦॥

નિર્વાણિકાઽઽરાધિતયા લક્ષ્મ્યા સાકં ભવાન્ પુરા ।
અનાદિસાઽવનનારાયણોઽભવત્ સ રક્ષતુ ॥ ૬૧॥

અંશુક્રમથનૃપતેર્ભક્ત્યા ત્વમભવઃ પુરા ।
અનાદિશ્રીસાધુનારાયણઃ કૃષ્ણઃ સ રક્ષતુ ॥ ૬૨॥

શમ્રસ્ય વર્ણિશાલસ્ય મનોરુજ્જીવનાય વૈ ।
અનાદિશ્રીભક્તનારાયણોઽભવઃ સ પાતુ નઃ ॥ ૬૩॥

વર્મધરક્ષ્મેશમોક્ષાર્થં ત્વં પુરા સ્વયં પ્રભુઃ ।
અનાદિશ્રીમેધનારાયણોઽભવઃ સ પાતુ નઃ ॥ ૬૪॥

અનલાદમહાસુરવિનાશાર્થં ભવાન્ પુરા ।
અનાદિશ્રીવહ્નિનારાયણોઽભવત્ સ પાતુ નઃ ॥ ૬૫॥

ઇલોદરવિનાશાર્થં રસનારાયણોઽભવઃ ।
સ ત્વં નારાયણ કૃષ્ણ કૃષ્ણ રક્ષય દાસિકાઃ ॥ ૬૬॥

અનાદિશ્રીચક્રનારાયણસ્ત્વં ચાઽભવઃ પુરા ।
દૈત્યનાશકરઃ કૃષ્ણ કૃષ્ણ રક્ષય દાસિકાઃ ॥ ૬૭॥

કૃતધર્મસ્થાપનાયાઽનાદિસત્યનરાયણઃ ।
અદ્રિસ્થિત્યર્થમનાદિશ્રીહિરણ્યનરાયણઃ ॥ ૬૮॥

ભક્તાર્થં ત્વમનાદિશ્રીનૈરઞ્જનિનરાયણઃ ।
અનાદિશ્રીપુણ્યનારાયણશ્ચાઽપ્યભવઃ પુરા ॥ ૬૯॥

પુણ્યવતીશાપનિવર્તકઃ કૃષ્ણઃ સ પાતુ નઃ ।
અનાદિશ્રીબૃહદ્બ્રહ્મનારાયણોઽભવદ્ભવાન્ ॥ ૭૦॥

અપ્સરસાં મનઃપૂર્ત્યૈ કૃષ્ણ રક્ષય દાસિકાઃ ।
અનાદિશ્રીગુરુનારાયણસ્ત્વં ચાઽભવઃ પુરા ॥ ૭૧॥

બ્રહ્મવિદ્યાપ્રદાનાર્થં કૃષ્ણ રક્ષય દાસિકાઃ ।
બૃહદ્ધર્મભૂપયજ્ઞે સાધુદીક્ષાપ્રદાયકઃ ॥ ૭૨॥

અનાદિશ્રીમદાચાર્યનારાયણઃ સ પાતુ નઃ ।
અનાદિશ્રીમહાવિદ્યુન્નારાયણોઽભવઃ પુરા ॥ ૭૩॥

વિદ્યુત્સ્તાવદૈત્યહન્તા કૃષ્ણ રક્ષય દાસિકાઃ ।
અનાદિશ્રીમધુનારાયણસ્ત્વં ચાઽભવઃ પુરા ॥ ૭૪॥

મધુભક્ષાસુરહન્તા કૃષ્ણ રક્ષય દાસિકાઃ ।
અનાદિશ્રીનાથનારાયણસ્ત્વં ચાઽભવઃ પુરા ॥ ૭૫॥

તિષ્યે દૈત્યવિનાશાર્થં કૃષ્ણ રક્ષય દાસિકાઃ ।
અનાદિશ્રીવિભુનારાયણસ્ત્વં ચાઽભવઃ પુરા ॥ ૭૬॥

સ્વર્ણોત્સવે વેધસઃ સ કૃષ્ણ રક્ષય દાસિકાઃ ।
અનાદિશ્રીમોક્ષનારાયણસ્ત્વં ચાઽભવઃ પુરા ॥ ૭૭॥

અનાદિશ્રીકૃષ્ણનારાયણસ્ત્વં કાન્તકેશવ ।
બ્રહ્મપ્રિયાદિસ્વામિન્નો લુણ્ઠકેભ્યઃ પ્રરક્ષય ॥ ૭૮॥

બાલકૃષ્ણ હરે કૃષ્ણ વલ્લભેશ કૃપાં કુરુ ।

લુણ્ઠકેભ્યોઽવનં શીઘ્રં કુરુ તે શરણં ગતાઃ ॥ ૭૯॥

ઇત્યુક્ત્વા તાઃ સ્ત્રિયશ્ચાપિ લક્ષ્મિ ધ્યાનં વ્યધુર્હરેઃ ।
અહં હરિઃ સ્વયં તત્રાઽઽગત્યાઽદૃશ્યોઽભવં ક્ષણમ્ ॥ ૮૦॥

શ઼ૃણ્વાનઃ સ્તુતિવાક્યાનિ મમ પ્રાક્ચરિતાનિ વૈ ।
લુણ્ઠકાશ્ચ સઞ્ચિન્વન્તિ ત્વેકત્ર નાણકાદિકમ્ ॥ ૮૧॥

ઇતિ શ્રીલક્ષ્મીનારાયણીયસંહિતાયાઃ દ્વાપરયુગસન્તાનાત્મકસ્ય તૃતીયખણ્ડે
૧૯૦-અધ્યાયાન્તર્ગતં મહાસૌરાષ્ટ્રીયસઙ્ઘસ્ય લુણ્ઠકજનપ્રધર્ષિતસ્ય
પુરુષોત્તમસ્તવનં સમ્પૂર્ણમ્ । continued

લક્ષ્મીનારાયણીયસંહિતા । ખણ્ડ ૩। અધ્યાય ૧૯૦/૧-૧૮૧॥

lakShmInArAyaNIyasaMhitA . khaNDa 3. adhyAya 190/1-181..

Proofread by PSA Easwaran

*Purushottamastavanam*

pdf was typeset on April 12, 2026

Please send corrections to *sanskrit@cheerful.com*